# छान्दोग्योपनिषत्

**ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुःश्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि ।**

**सर्वं ब्रह्मौपनिषदम् । माहं ब्रह्म निराकुर्याम् । मा मा ब्रह्म निराकरोत् ।**

**अनिराकरणमस्त्वनिराकरणं मे अस्तु ।**

**तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु । ते मयि सन्तु ।**

**ॐ शान्तिः शान्तिः शान्तिः ।।**

**मम** मुमुक्षोः **अङ्गानि** करचरणादीनि **वाग्** इति इतरकर्मेन्द्रियाणामुपलक्षणम्। **प्राण**: इति अपानादीनामुपलक्षणम्। **चक्षुः** **श्रोत्रम्** इति इतरज्ञानेन्द्रियाणामुपलक्षणम्।

तथा च मम **सर्वाणि** **इन्द्रियाणि** प्राणपञ्चकं च **आप्यायन्तु** ब्रह्माध्ययनानुकूलतया (**बलम्**) वृद्धिं प्राप्नुवन्तु।

**सर्वं** निखिलमुपनिषदम् **औपनिषदं** **ब्रह्म** ब्रह्मैव, ब्रह्मसत्तातिरिक्तसत्ताशून्यं निखिलमिति यावत्।

**अहं** ब्रह्मातिरिक्तं वस्त्वस्तीति वा ब्रह्म नास्तीति वा **ब्रह्म** **मा** **निराकुर्यां** मा तिरस्कुर्याम्।

**मा** मां **ब्रह्म** **मा** **निराकरोत्**। स्वस्मान् मा वियोजयतु। संसारे मा पायतयु इति यावत्।

**अनिराकरणमस्तु** आवयोः परस्परं प्रीतिरेवास्तु। **तदात्मनि** ब्रह्मात्मनि **निरते** निरन्तरं प्रेम कुर्वति **ये** शमादयः

**उपनिषत्सु** वेदान्तेषु प्रकाशिताः **धर्मास्ते** धर्माः **मयि** **सन्तु**। आवृत्तिरादरार्था।

शान्तिशब्दस्य त्रिरुक्तिस्तु आध्यात्मिकादि-त्रिविध-विघ्न-प्रशान्त्यर्थमिति बोध्यम्।।

# अध्यायः ६

## प्रथमः खण्डः

श्वेतकेतुः ह आरुणेय आस इत्याद्यध्याय-सम्बन्धः। “सर्वं खल्विदं ब्रह्म तज्जलान्” (छा. ३.१४.१) इत्युक्तम्।

कथं तस्माज्जगदिदं जायते, तस्मिन्नेव च लीयते, अनिति च तेनैव इत्येतद् वक्तव्यम्।

अनन्तरं च (छा. ५.१९.१ - ५.२३.१) एकस्मिन् भुक्ते विदुषि सर्वं जगत् तृप्तं भवतीत्युक्तम्।

तदेकत्वे सत्यात्मनः सर्वभूतस्थस्योपपद्यते नात्मभेदे।

कथं च तदेकत्वमिति तदर्थोऽयं षष्ठोऽध्याय आरभ्यते।

पिता-पुत्राख्यायिका विद्यायाः सारिष्ठत्व-प्रदर्शनार्था।

**श्वेतकेतुर्हारुणेय आस। त॒ँह पितोवाच। श्वेतकेतो वस ब्रह्मचर्यम्।**

**न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति।। ६.१.१।।**

ओम्। श्वेतकेतुः ह आरुणेयः आस तं ह पिता उवाच। श्वेतकेतो वस ब्रह्मचर्यम्। सोम्य अस्मत्कुलीनः अननूच्य ब्रह्मबन्धुः इव न वै भवति इति। (१)।

**श्वेतकेतुः** इति नामतः **ह** इत्यैतिह्यार्थः। **आरुणेयः** अरुणस्य पौत्रः **आस** बभूव। **तं** पुत्रं **ह** आरुणिः **पिता** योग्यं विद्या-भाजनं मन्वानस्तस्योपनयन-कालात्ययं च पश्यन् **उवाच**। **हे** **श्वेतकेतो** अनुरूपं गुरुं कुलस्य नो गत्वा **वस** **ब्रह्मचर्यम्**। **न** च एतद्युक्तं यद् **अस्मत्कुलीनः** हे **सोम्य** **अननूच्य** अनधीत्य **ब्रह्मबन्धुः** **इव** **भवति** इति ब्राह्मणान् बन्धून् व्यपदिशति, न स्वयं ब्राह्मण-वृत्त इति। तस्य अतः प्रवासो अनुमीयते पितुः येन स्वयं गुणवान् सन् पुत्रं नोपनेष्यति।। १।।

**स ह द्वादशवर्ष उपेत्य चतुर्वि ँ्शतिवर्षः सर्वान् वेदानधीत्य महामना**

**अनूचानमानी स्तब्ध एयाय। त ँ्ह पितोवाच श्वेतकेतो यन्नु सोम्येदं महामना**

**अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यः।। ६.१.२ ।।**

सः ह द्वादशवर्षः उपेत्य चतुर्विंशतिवर्षः सर्वान् वेदान् अधीत्य महामनाः अनूचानमानी स्तब्धः एयाय। तम् ह पिता उवाच - श्वेतकेतो सोम्य यद् नु इदं महामनाः अनूचानमानी स्तब्धः असि। उत तम् आदेशम् अप्राक्ष्यः। (२)

**सः** पित्रोक्तः श्वेतकेतुः **ह** **द्वादशवर्षः** सन् **उपेत्य** आचार्यं यावत् **चतुर्विंशतिवर्षः** बभूव तावत् **सर्वान्** **वेदान्** च चतुरोऽपि **अधीत्य** तदर्थं च बुद्ध्वा **महामनाः** महद् गम्भीरं मनो यस्य असममात्मानमन्यैर्मन्यमानं मनो यस्य सोऽयं महामनाः **अनूचानमानी** अनूचानम् आत्मानं मन्यते इत्येवं-शीलः स अनूचानमानी **स्तब्धः** अप्रणत-स्वभावः **एयाय** गृहम्।

**तम्** एवं-भूतं **ह** आत्मनोऽननुरूप-शीलं स्तब्धं मानिनं पुत्रं दृष्ट्वा **पितोवाच** सद्धर्मावतार-चिकीर्षया।

**श्वेतकेतो** **यन्नु** **इदं** **महामनाः** **अनूचानमानी** **स्तब्धः** च **असि** कस्ते अतिशयः प्राप्तः उपाध्यायात्? **उत** अपि

**तमादेशम्** आदिश्यते इत्यादेशः केवल-शास्त्राचार्योपदेश-गम्यम् इत्येतत्।

येन वा परं ब्रह्मादिश्यते स आदेशस्तम् **अप्राक्ष्यः** पृष्टवानसि आचार्यम्।। २ ।।

तमादेशं विशिनष्टि -

**येनाश्रुतँ् श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति।**

**कथं नु भगवः स आदेशो भवतीति।। ६.१.३।।**

येन अश्रुतम् श्रुतम् भवति अमतम् मतम् अविज्ञातम् विज्ञातम् इति। कथम् नु भगवः सः आदेशः भवति इति। (३)

**येन** आदेशेन श्रुतेन **अश्रुतम्** अप्यन्यत् **श्रुतं** भवति। **अमतं** **मतम्** अतर्कितं तर्कितं भवति।

**अविज्ञातं** **विज्ञातम्** अनिश्चितं निश्चितं भवति **इति**। सर्वानपि वेदानधीत्य सर्वं चान्यद् वेद्यमधिगम्यापि अकृतार्थ

एव भवति यावदात्म-तत्त्वं न जानाति इति आख्यायिकातोऽवगम्यते।

तदेतदद्भुदं श्रुत्वाऽऽह - कथं नु एतदप्रसिद्धमन्य-विज्ञानेन अन्यद्विज्ञातं भवतीत्येवं मन्वानः पृच्छति - **कथं** **नु**

केन प्रकारेण हे **भगवः** **स** **आदेशो** **भवतीति**।। ३।।

यथा स आदेशो भवति तच्छृणु -

**यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातँ स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्।। ६.१.४।।**

सोम्य यथा एकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्। विकारः नामधेयम्। वाचारम्भणम्। मृत्तिका एव सत्यम् इति (स आदेशः भवति)।

हे **सोम्य** **यथा** लोके **एकेन** **मृत्पिण्डेन** करक-कुम्भादि-कारण-भूतेन[1] विज्ञातेन **सर्वम्** अन्यत् तद्विकार-जातं **मृण्मयं** मृद्विकार-जातं **विज्ञातं** **स्यात्**।

[1] घटशरावादिकारणभूतेन इति पाठान्तरम्।

**आक्षेपः**

कथं मृत्पिण्डे कारणे विज्ञाते कार्यम् अन्यद्विज्ञातं स्यात्**?**

**समाधानम्**

नैष दोषः। कारणेनानन्यत्वात् कार्यस्य। यन्मन्यसे अन्यस्मिन् विज्ञाते अन्यन्न ज्ञायते इति।

सत्यमेवं स्यात्, यद्यन्यत् कारणात् कार्यं स्यात्। न त्वेवम् अन्यत्कारणात् कार्यम्।

**आक्षेपः**

कथं तर्हीदं लोके ‘इदं कारणम्, अयमस्य विकारः’ इति**?**

**समाधानम्**

शृणु। **वाचारम्भणं** वागारम्भणं वागालम्बनम् इत्येतत्। कोऽसौ**?** **विकारः**। **नामधेयं** (नामैव नामधेयं) स्वार्थे

धेय-प्रत्ययः। वागालम्बनमात्रं नामैव केवलं, न विकारो नाम वस्त्वस्ति परमार्थतः।

**मृत्तिका** **इत्येव** मृत्तिका एव तु **सत्यं** वस्त्वस्ति।। ४।।

**यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञात ँ्स्याद्वाचारम्भणं विकारो**

**नामधेयं लोहमित्येव सत्यम्।। ६.१.५।।**

सोम्य यथा एकेन लोहमणिना सर्वम् लोहमयम् विज्ञातम् स्याद्। विकारः नामधेयम्। वाचारम्भणम्। लोहम् एव सत्यम् इति (स आदेशः भवति)

**यथा** **सोम्य** **एकेन** **लोहमणिना** सुवर्ण-पिण्डेन **सर्वम्** अन्यद्विकार-जातं कटक-मुकुट-केयूरादि **विज्ञातं** **स्यात्**।

वाचारम्भणमित्यादि समानम्।। ५।।

**यथा सोम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातँ स्याद्वाचारम्भणं विकारो नामधेयं कृष्णायसमित्येव सत्यम्। एवँ सोम्य स आदेशो भवतीति।। ६.१.६।।**

सोम्य यथा एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्याद्। विकारः नामधेयम्। वाचारम्भणम्। कृष्णायसम् एव सत्यम् एवं सोम्य स आदेशो भवति इति। (६)

**यथा सोम्य एकेन नखनिकृन्तनेन** उपलक्षितेन कृष्णायस-पिण्डेन इत्यर्थः। **सर्वं कार्ष्णायसं** कृष्णायस-विकार-जातं विज्ञातं स्यात्। समानमन्यत्। अनेक-दृष्टान्तोपादानं[2] दार्ष्टान्तिकानेक-भेदानुगमार्थं दृढ-प्रतीत्यर्थं च। **एवं सोम्य सः आदेशः** यो मयोक्तो **भवति**।। ६।।

---

[2] 1) To prove that you take any one thing, this truth holds good. 2) to produce clear knowledge 3) Pot clay and original clay is different - Clay undergoes some change. But in chain, gold form or svarupa of gold is retained without any change. 4) In chain example, arthakriya is not there. It is non-functionary example. So nailcutter example is used. Vikara is not only a shape, it is also useful. Even they are not separate from their cause. Ornaments are of no use really. It has only embellishment value. So functions also mithya

इत्युक्तवति पितर्याह इतरः -

**न वै नूनं भगवन्तस्त एतदवेदिषुर्यद्ध्येतदवेदिष्यन् कथं मे नावक्ष्यन्निति।**

**भगवाँ् स्त्वेव मे तद्ब्रवीत्विति। तथा सोम्येति होवाच।। ६.१.७।।**

नूनम् भगवन्तः ते एतद् न वै अवेदिषुः। यद् हि एतद् अवेदिष्यन् मे कथं न अवक्ष्यन् इति। भगवान् तु एव मे तद् ब्रवीतु इति। सोम्य तथा इति ह उवाच। (७)

**न** **वै** **नूनं** **भगवन्तः** पूजावन्तः गुरवः मम ये **ते** **एतद्** यद्भवदुक्तं वस्तु **नावेदिषुः** न विज्ञातवन्तो नूनम्।

**यद्** यदि **हि** **अवेदिष्यन्** विदितवन्तः **एतद्** वस्तु **कथं** **मे** गुणवते भक्तायानुगताय **नावक्ष्यन्** न उक्तवन्तः।

तेनाहं मन्ये न विदितवन्तः **इति**। अवाच्यमपि गुरोः न्यग्भावमवादीत् पुनः गुरु-कुलं प्रति प्रेषण-भयात्।

अतो **भगवान्** **तु** **एव** **मे** मह्यं **तद्** वस्तु येन सर्वज्ञत्वं ज्ञातेन मे स्यात् तद् **ब्रवीतु** कथयतु इति उक्तः पिता

**उवाच** **तथा** अस्तु **सोम्य** **इति**।। ७।।

## द्वितीयः खण्डः

**[3]सदेव सोम्येदमग्रे आसीदेकमेवाद्वितीयम्।**

**तद्धैक आहुरसदेवेदमग्रे आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत।। ६.२. १।।**

सोम्य* अग्रे इदम् एकम् एव अद्वितीयं सद् एव आसीद्। तद् ह एके आहुः अग्रे इदम् एकम् एव अद्वितीयं असद् आसीद् तस्माद् असतः सद् जायत (इति)। (१)

**सदेव** सदिति अस्तिता-मात्रं वस्तु सूक्ष्मं निर्विशेषं सर्वगतम् एकं निरञ्जनं निरवयवं विज्ञानं यदवगम्यते सर्व-वेदान्तेभ्यः। एव-शब्दः अवधारणार्थः।

किं तदवध्रियते इत्याह - **इदं** जगत्, नाम-रूप-क्रियावद्विकृतम् उपलभ्यते यत् तत्सदेव **आसीद्** इति आसीच्छब्देन सम्बध्यते। कदा सदेवेदमासीद् इत्युच्यते - **अग्रे** जगतः प्रागुत्पत्तेः।

---

[3] ब्रह्मसूत्रसमन्वयाधिकरणे (१.१.४) सदेवेत्याद्याध्यायः अद्वितीये ब्रह्मणि समन्वेति इत्युक्तम्।

**आक्षेपः**

किं न इदानीम् इदं सत्, येन अग्रे आसीदिति विशेष्यते?

**समाधानम्**

न।

**आक्षेपः**

कथं तर्हि विशेषणम्?

**समाधानम्**

इदानीमपि इदं सदेव, किन्तु नाम-रूप-विशेषणवद् इदं-शब्द-बुद्धि-विषयं चेति इदं च भवति।

प्रागुत्पत्तेः तु अग्रे केवल-सच्छब्द-बुद्धि-मात्र-गम्यमेव इति सदेवेदमग्रे आसीद् इत्यवधार्यते।

न हि प्रागुत्पत्तेः नामवद्रूपवद् वा इदमिति ग्रहीतुं शक्यं वस्तु, सुषुप्त-काले इव।

यथा सुषुप्तादुत्थितः सत्त्व-मात्रम् अवगच्छति सुषुप्ते सन्मात्रमेव केवलं वस्तु इति तथा प्रागुत्पत्तेः इत्यभिप्रायः।

यथा इदमुच्यते लोके पूर्वाह्णे घटादि सिसृक्षुणा कुलालेन मृत्पिण्डं प्रसारितमुपलभ्य ग्रामान्तरं गत्वा प्रत्यागतः

अपराह्णे तत्रैव घट-शरावाद्यनेक-भेद-भिन्नं कार्यमुपलभ्य मृदेव इदं घट-शरावादि केवलं पूर्वाह्णे आसीदिति तथा

इहापि उच्यते सदेवेदमग्रे आसीदिति।

**एकम् एवेति**। स्व-कार्य-पतितम् अन्यन्नास्ति इति एकम् एवेत्युच्यते। **अद्वितीयमिति**।

मृद्व्यतिरेकेण मृदः यथा अन्यद् घटाद्याकारेण परिणमयितृ-कुलालादि-निमित्त-कारणं दृष्टं तथा सद्व्यतिरेकेण सतः

सहकारि-कारणं द्वितीयं वस्त्वन्तरं प्राप्तं प्रतिषिध्यते अद्वितीयमिति। नास्य द्वितीयं वस्त्वन्तरं विद्यते इत्यद्वितीयम्।

**आक्षेपः**

ननु वैशेषिक-पक्षे अपि सत्सामानाधिकरण्यं सर्वस्य उपपद्यते। द्रव्य-गुणादिषु सच्छब्द-बुद्ध्यनुवृत्तेः।

सद्द्रव्यं सन्गुणः सत्कर्म इत्यादि-दर्शनात्।

**वैशेषिक-कल्पितात् सतः अत्र भेदप्रदर्शनम्**

**समाधानम्**

सत्यमेवं स्याद् इदानीम्। प्रागुत्पत्तेः तु नैवेदं कार्यं सदेवासीत् इत्यभ्युपगम्यते वैशेषिकैः।

प्रागुत्पत्तेः कार्यस्य असत्वाभ्युपगमात्। न चैकमेव सद् अद्वितीयं प्रागुत्पत्तेः इच्छन्ति।

तस्माद् वैशेषिक-परिकल्पितात् सतः अन्यत् कारणमिदं सदुच्यते मृदादि-दृष्टान्तेभ्यः।।

**वैनाशिकमतम्**

**तत्** तत्र **ह** एतस्मिन् प्रागुत्पत्तेः वस्तु-निरूपणे **एके** वैनाशिकाः **आहुः** वस्तु निरूपयन्तः, **असद्** सदभाव-मात्रं प्रागुत्पत्तेः **इदं** जगद् एकम् **एव** **अग्रे** अद्वितीयम् **आसीदिति**।

सदभाव-मात्रं हि प्रागुत्पत्तेः तत्त्वं कल्पयन्ति बौद्धाः।

न तु सत् प्रतिद्वन्द्वि वस्त्वन्तरम् इच्छन्ति, यथा सच्चासदिति गृह्यमाणं यथाभूतं तद्विपरीतं तत्त्वं भवति इति नैयायिकाः[4]।।

**वैनाशिकमतसमीक्षणम्**

**आक्षेपः**

ननु सदभावमात्रं प्रागुत्पत्तेः चेद् अभिप्रेतं वैनाशिकैः कथं प्रागुत्पत्तेः इदमासीद् असत्, एकमेव अद्वितीयं च इति काल-सम्बन्धः, संख्या-सम्बन्धः, अद्वितीयत्वं च, उच्यते तैः।

[4] यथा गृह्यमाणं यथाभूतं (सत्), तद्विपरीतं (असत्), तत्त्वं भवति इति, सत् असत् च इति (इति द्विविधं तत्वं भवति इति) नैयायिकाः। यथा एवंभूतमभावं वस्तुभूतं नैयायिकाः अभ्युपगच्छन्ति न तथा वैनाशिकाः इति पिण्डितार्थः।

**समाधानम्**

बाढम्। न युक्तं तेषां भावाभावमात्रम् अभ्युपगच्छताम्।

असत्वमात्राभ्युपगमोऽपि अयुक्तः एव अभ्युपगन्तुः अनभ्युपगमानुपपत्तेः।

**आक्षेपः**

इदानीं अभ्युपगन्ता अभ्युपगम्यते न प्रागुत्पत्तेः इति चेत्।

**समाधानम्**

न। प्रागुत्पत्तेः सदभावस्य प्रमाणाभावात्। प्रागुत्पत्तेः असदेवेति कल्पनानुपपत्तिः।

**मीमांसकाक्षेपः**

ननु[5] कथं वस्त्वाकृतेः शब्दार्थत्वे[6] असदेकमेव अद्वितीयमिति पदार्थ-वाक्यार्थोपपत्तिः, तदनुपपत्तौ च इदं वाक्यमप्रमाणं प्रसज्येत इति चेत्।

**समाधानम्**

नैष दोषः। सद्-ग्रहण-निवृत्ति-परत्वात् वाक्यस्य। सदित्ययं तावच्छब्दः सदाकृति-वाचकः।

---

[5] असदेकमेवाद्वितीयमिति श्रुतिस्थ-पदानाम् अर्थाभावेन अन्वयाभावाद् असदेवेत्यादिवेदवाक्यम् अप्रमाणं स्यादिति शङ्का।

[6] शब्दार्थः वस्त्वाकृतिः (वस्तुगता आकृतिः) भवति इति।

एकमेवाद्वितीयमित्येतौ च सच्छब्देन समानाधिकरणौ। तथा इदमासीदिति च।

तत्र नञ् सद्वाक्ये प्रयुक्तः सद्वाक्यमेव आलम्ब्य सद्वाक्यार्थ-विषयां बुद्धिम्, अवलम्ब्य सदेकमेवाद्वितीयम् इदमासीद् इत्येवं लक्षणाम्, ततः सद्वाक्यार्थान्निवर्त्तयतति अश्वारूढ इव अश्वालम्बनः अश्वं तदभिमुख-विषयान्निवर्त्तयति तद्वत्। न तु पुनः सदभावमेव अभिधत्ते। अतः पुरुषस्य विपरीत-ग्रहण-निवृत्त्यर्थ-परम् इदम् "असदेव" इत्यादि वाक्यं प्रयुज्यते। दर्शयित्वा हि विपरीत-ग्रहणं ततो निवर्त्तयितुं शक्यते इत्यर्थवत्त्वाद् असदादि-वाक्यस्य श्रौतत्वं प्रामाण्यं च सिद्धमित्यदोषः।

तस्माद् **असतः** सर्वाभावरूपात् **सद्** विद्यमानम् अ**जायत**[7] समुत्पन्नम्। अडभावश्छान्दसः।।१।।

---

[7] अत्र अडभावश्छान्दसः।

तदेतद्विपरीत-ग्रहणं महा-वैनाशिक-पक्षं दर्शयित्वा प्रतिषेधति -

**कुतस्तु खलु सोम्यैवँ्स्यादिति होवाच कथमसतः सज्जायेतेति।**

**सत्त्वेव सोम्येदमग्रे आसीदेकमेवाद्वितीयम्।। ६.२.२ ।।**

सः ह द्वादशवर्षः उपेत्य चतुर्विंशतिवर्षः सर्वान् वेदान् अधीत्य महामनाः अनूचानमानी स्तब्धः एयाय। तम् ह पिता उवाच - श्वेतकेतो सोम्य यद् नु इदं महामनाः अनूचानमानी स्तब्धः असि। उत तम् आदेशम् अप्राक्ष्यः। (२)

**वैनाशिकमतखण्डनम्**

**कुतस्तु** प्रमाणात् **खलु** हे **सोम्य** **एवं** **स्याद्** असतः सज्जायेत इति एवं कुतः भवेत्**?** न कुतश्चित् प्रमाणात् एवं

सम्भवति इत्यर्थः। यदपि बीजोपमर्दे अङ्कुरो जायमानो दृष्टः अभावादेव इति, तदपि अभ्युपगम-विरुद्धं तेषाम्।

कथम्**?** ये तावद् बीजावयवाः बीज-संस्थान-विशिष्टाः ते अङ्कुरेऽपि अनुवर्त्तन्ते एव, न तेषाम् उपमर्दः

अङ्कुर-जन्मनि।

यत्पुनः बीजाकार-संस्थानं तद्बीजावयव-व्यतिरेकेण वस्तु-भूतं न वैनाशिकैः अभ्युपगम्यते यद् अङ्कुर-जन्मन्युपमृद्येत। अथ तद्[8] अस्त्यवयव-व्यतिरिक्तं वस्तुभूतं तथा च सति अभ्युपगम-विरोधः।।

**आक्षेपः**

अथ संवृत्या[9] अभ्युपगतं बीज-संस्थान-रूपम् उपमृद्यत इति चेत्।

**समाधानम्**

केयं संवृतिर्नाम**?** किम् असौ अभावः उत भाव इति। यद्यभावः दृष्टान्ताभावः।

अथ भावः तथापि न अभावादङ्कुरोत्पत्तिः[10], बीजावयवेभ्यः हि अङ्कुरोत्पत्तिः।।

---

[8] बीजाकार-संस्थानम्। अवयवसमुदायातिरिक्त-अवयवि-अङ्गीकारे इत्यर्थः।

[9] संवृतिः लौकिक-व्यवहारः।

[10] बीजावयवानां अङ्कुरे अनुस्यूतत्वेन।

**आक्षेपः**

अवयवाः अपि उपमृद्यन्ते इति चेत्।

**समाधानम्**

न। तद्[11] अवयवेषु तुल्यत्वात्।

यथा वैनाशिकानां बीज-संस्थान-रूपः अवयवी नास्ति, तथा अवयवाः अपि (नास्ति), इति तेषामपि उपमर्दानुपपत्तिः। बीजावयवानामपि सूक्ष्मावयवाः तदवयवानामपि अन्ये सूक्ष्मतरावयवाः इत्येवं प्रसङ्गस्य अनिवृत्तेः सर्वत्र उपमर्दानुपपत्तिः, सद्बुद्ध्यनुवृत्तेः सत्त्वानिवृत्तिः च, इति सद्वादिनां सत एव सदुत्पत्तिः सेत्स्यति।

न तु असद्वादिनां दृष्टान्तोऽस्ति असतः सदुत्पत्तेः।

मृत्पिण्डात् घटोत्पत्तिः दृश्यते सद्वादिनाम्। तद्भावे भावात्[12] तदभावे चाभावात्।।

यद्यभावादेव घट उत्पद्येत घटार्थिना मृत्पिण्डः नोपादीयेत।

---

[11] उपमर्दनायोगरूपदोषः। तदेव स्फुटयति यथेति।

[12] मृत्पिण्डभावे धटभावात्।

अभाव-शब्द-बुद्ध्यनुवृत्तिश्च घटादौ प्रसज्येत, न त्वेतदस्ति। अतः नासतः सदुत्पत्तिः।

यदप्याहुः मृद्-बुद्धिः घट-बुद्धेः निमित्तमिति मृद्-बुद्धिः घटबुद्धेः कारणमुच्यते, न तु परमार्थतः एव मृद् घटो वा

अस्ति इति, तदपि मृद्-बुद्धिः विद्यमाना विद्यमानायाः एव घट-बुद्धेः कारणमिति नासतः सदुत्पत्तिः।

**आक्षेपः**

मृद्-घट-बुद्ध्योः निमित्त-नैमित्तकतया आनन्तर्य-मात्रं न तु कार्य-कारणत्वम् इति चेत्।

**समाधानम् :**

न। बुद्धीनां नैरन्तर्ये गम्यमाने वैनाशिकानां बहिर्दृष्टान्ताभावात्[13]।

अतः कुतस्तु खलु सोम्य एवं स्यादिति **होवाच** **कथं** केन प्रकारेण **असतः** **सज्जायेत** इति।

असतः सदुत्पत्तौ न कश्चिदपि दृष्टान्त-प्रकारः अस्तीत्यभिप्रायः।

एवम् असद्वादि-पक्षम् उन्मथ्य अपसंहरति **सत्त्वेव** **सोम्य** **इदमग्रे** **आसीद्** इति स्वपक्ष-सिद्धिम्।

---

13 बौद्धाः बाह्यपदार्थसत्तां नाङ्गीक्रियन्ते। तस्माद् बाह्यदृष्टान्ताभावः तेषाम्।

**आक्षेपः**

ननु सद्वादिनोऽपि सतः सदुत्पद्यते इति नैव दृष्टान्तोऽस्ति। घटाद् घटान्तरोत्पत्त्यदर्शनात्।

**समाधानम्**

सत्यमेवं न सतः सदन्तरमुत्पद्यते। किं तर्हि? सदेव संस्थानान्तरेण अवतिष्ठते। यथा सर्पः कुण्डली भवति।

यथा च मृत् चूर्ण-पिण्ड-घट-कपालादि-प्रभेदैः।

**आक्षेपः**

यद्येवं सदेव सर्व-प्रकारावस्थं कथं प्रागुत्पत्तेः इदमासीदिति उच्यते?

**समाधानम्**

ननु न श्रुतं त्वया सदेव इत्यवधारणम् इदं-शब्द-वाच्यस्य कार्यस्य।

**आक्षेपः**

प्राप्तं तर्हि प्रागुत्पत्तेः असदेव आसीत्, नेदं-शब्द-वाच्यम्, 'इदानीमिदं जातम्' इति।

**समाधानम्**

न। सत एव इदं-शब्द-बुद्धि-विषयतया अवस्थानाद् यथा मृदेव पिण्ड-घटादि-शब्द-बुद्धि-विषयत्वेन अवतिष्ठते

तद्वत्।

**आक्षेपः**

ननु यथा मृद् वस्तु, एवं पिण्डघटाद्यपि।

तद्वत् सद्-बुद्धेः अन्य-बुद्धि-विषयत्वात् कार्यस्य, सतः अन्यद्वस्त्वन्तरं स्यात् कार्य-जातं, यथा अश्वाद् गौः।

**समाधानम्**

न। पिण्ड-घटादीनाम् इतरेतर-व्यभिचारेऽपि मृत्त्वाव्यभिचारात्। यद्यपि घटः पिण्डं व्यभिचरति, पिण्डश्च घटं,

तथापि पिण्ड-घटौ मृत्त्वं न व्यभिचरतः। तस्मान्मृन्मात्रं पिण्ड-घटौ। व्यभिचरति तु अश्वं गौः अश्वो वा गाम्।

तस्मान्मृदादि-संस्थान-मात्रं घटादयः। एवं सत्संस्थान-मात्रमिदं सर्वम् इति युक्तं प्रागुत्पत्तेः सदेवेति।

वाचारम्भणमात्रत्वाद् विकार-संस्थानस्य।

**आक्षेपः**

ननु निरवयवं सत्, “निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्” (श्वे ६.१९) “दिव्यो ह्यमूर्त्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः” (मु. २.१.२) इत्यादि-श्रुतिभ्यः निरवयवस्य सतः कथं विकार-संस्थानमुपपद्यते।

**समाधानम्**

नैष दोषः। रज्ज्वाद्यवयवेभ्यः सर्पादि-संस्थानवत्, बुद्धि-परिकल्पितेभ्यः सदवयवेभ्यः विकार-संस्थानोपपत्तेः। “वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्” (छा. ६.१.४), एवं “सदेव सत्यम्” इति श्रुतेः।

**एकमेवाद्वितीयम्** परमार्थतः इदं-बुद्धि-कालेऽपि।। २ ।।

**तदैक्षत। बहु स्यां प्रजायेयेति। तत्तेजोऽसृजत। तत्तेज ऐक्षत।**

**बहु स्यां प्रजायेयेति। तदपोऽसृजत। तस्माद्यत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस**

**एव तदध्यापो जायन्ते।। ६.२.३ ।।**

बहुस्यां प्रजायेय इति तद् ऐक्षत। तत् तेजः असृजत । बहु स्यां प्रजायेय इति तत् तेजः ऐक्षत। तद् अपः असृजत ।
तस्माद् पुरुषः यत्र क्व च शोचति स्वेदते वा तेजसः एव तद् अपः अधिजायन्ते ।। (३)

**तत्** सद् **ऐक्षत** ईक्षां दर्शनं कृतवत्। अतश्च न प्रधानं सांख्य-परिकल्पितं जगत्कारणम्। प्रधानस्य

अचेतनत्वाभ्युपगमात्। इदं तु सत् चेतनम् ईक्षितृत्वात्। तत् कथम् ऐक्षत? इत्याह - **बहु** प्रभूतम्।

**स्यां** भवेयम्। **प्रजायेय** प्रकर्षेण उत्पद्येय।

यथा मृद् घटाद्याकारेण यथा वा रज्ज्वादि सर्पाद्याकारेण बुद्धि-परिकल्पितेन।

**आक्षेपः**

असदेव तर्हि सर्वं यद् गृह्यते रज्जुः इव सर्पाद्याकारेण।

**समाधानम्**

न। सत एव द्वैत-भेदेन अन्यथा गृह्यमाणत्वात् न असत्त्वं कस्यचित् क्वचिद् इति ब्रूमः।

**[14]**यथा सतः अन्यद्वस्त्वन्तरं परिकल्प्य पुनस्तस्यैव प्रागुत्पत्तेः, प्रध्वंसाच्च ऊर्ध्वम्, असत्त्वं ब्रुवते तार्किकाः,

न तथा अस्माभिः कदाचित् क्वचिदपि सतः अन्यदभिधानम् अभिधेयं वा वस्तु परिकल्प्यते।

सदेव तु सर्वम् अभिधानम् अभिधीयते च यदन्य-बुद्ध्या।

यथा रज्जुरेव सर्प-बुद्ध्या सर्प इत्यभिधीयते, यथा वा पिण्ड-घटादि मृदोऽन्य-बुद्ध्या पिण्ड-घटादि-शब्देन अभिधीयते लोके। रज्जु-विवेक-दर्शिनां तु सर्पाभिधान-बुद्धी निवर्त्तेते, यथा च मृद्-विवेक-दर्शिनां घटादि-शब्द-बुद्धी, तद्वत् सद्विवेक-दर्शिनां अन्य-विकार-शब्द-बुद्धी निवर्त्तेते।

---

[14] तदेव स्फुटयति यथेति।

“यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह” (तै. २.४), “अनिरुक्तेऽनिलयने” (तै. २.७) इत्यादि श्रुतिभ्यः।

एवम् ईक्षित्वा **तत्तेजोऽसृजत** तेजः सृष्टवत्।

**आक्षेपः**

ननु “तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः” (तै. २.१) इति श्रुत्यन्तरे आकाशाद्वायुः, ततः तृतीयं तेजः श्रुतम्, इह तु कथं प्राथम्येन। तस्मादेव तेजः सृज्यते, ततः एव च आकाशम् इति विरुद्धम्।।

**समाधानम्**

नैष दोषः। आकाश-वायु-सर्गानन्तरं तत्सत् तेजोऽसृजत इति कल्पनोपपत्तेः। अथ वा अविवक्षितः इह सृष्टि-क्रमः। सत्कार्यम् इदं सर्वम् अतः सदेकमेवाद्वितीयम् इति एतद्विवक्षितम्, मृदादि-दृष्टान्तात्। अथ वा त्रिवृत्करणस्य विवक्षितत्वात् तेजोबन्नानाम् एव सृष्टिमाचष्टे।।

तेजः इति प्रसिद्धं लोके - दग्धृ, पक्तृ, प्रकाशकं, रोहितं चेति।

**तत्** सत्सृष्टं तेजः **ऐक्षत**, तेजो-रूप-संस्थितं सदैक्षत इत्यर्थः।

**बहु** **स्यां** **प्रजायेयेति** पूर्ववत्।

**तदपोऽसृजत**। आपो द्रवाः, स्निग्धाः, स्यन्दिन्यः, शुक्लाश्चेति प्रसिद्धा लोके।

यस्मात्तेजसः कार्य-भूताः आपः **तस्माद्यत्र** **क्व** **च** देशे काले वा **शोचति** सन्तप्यते **स्वेदते** प्रस्विद्यते **वा**

**पुरुषस्तेजस** **एव** **तत्** तदा **आपः** **अधि** **जायन्ते**।। ३ ।।

**ता आपः ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति। ता अन्नमसृजन्त। तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवत्यद्भ्यः एव तदध्यन्नाद्यं जायते।। ६.२.४ ।।**

ताः आपः ऐक्षन्त बह्व्यः स्याम प्रजायेमहि इति ताः अन्नम् असृजन्त तस्माद् यत्र क्व च वर्षति तदेव भूयिष्ठम् अन्नं भवति तद् (तत्र) अद्भ्यः एव अन्नाद्यं अधिजायते ।। ४

**ता**ः **आपः** **ऐक्षन्त** पूर्ववदेव अबाकार-संस्थितं सदैक्षत इत्यर्थः।

**बह्व्यः** प्रभूताः **स्याम** भवेम **प्रजायेमहि** उत्पद्येमहि **इति**। **ताः** **अन्नमसृजन्त** पृथिवी-लक्षणम्। पार्थिवं ह्यन्नम्।

यस्मादप्कार्यमन्नं **तस्माद्यत्र** **क्व** **च** **वर्षति** देशे **तत्** तत्र **एव** **भूयिष्ठम्** प्रभूतम् **अन्नम्** **भवति**।

अतः **अद्भ्य**ः **एव** **तदन्नाद्यम्** **अधि** **जायते**। ताः अन्नम् असृजन्तेति पृथिवी उक्ता पूर्वम्।

इह तु दृष्टान्ते अन्नं च तदाद्यं चेति विशेषणाद् व्रीहि-यवाद्या उच्यन्ते। अन्नं च गुरु, स्थिरं, धारणं, कृष्णं च रूपतः प्रसिद्धम्।।

**आक्षेपः**

ननु तेजः-प्रभृतिषु ईक्षणं न गम्यते हिंसादि-प्रतिषेधाभावात् त्रासादि-कार्यानुपलम्भाच्च।

तत्र कथं "तत् तेजः ऐक्षत" इत्यादि।

**समाधानम्**

नैष दोषः। ईक्षितृ-कारण-परिणामत्वात् तेजः-प्रभृतीनां सतः इव[15] ईक्षितुः नियत-क्रम-विशिष्ट-कार्योत्पादकत्वाच्च

तेजः-प्रभृति ईक्षत इव ईक्षत इत्युच्यते भूतम्[16]।

**आक्षेपः**

ननु सतः अपि उपचरितमेव ईक्षितृत्वम्।

**समाधानम्**

न। सदीक्षणस्य केवल-शब्द-गम्यत्वात्, न शक्यम् उपचरितं कल्पयितुम्। तेजः-प्रभृतीनां तु अनुमीयते

मुख्येक्षणाभावः इति, युक्तम् उपचरितं कल्पयितुम्।

---

[15] एव इति वा पाठः।

[16] तेज आदिषु अभूतं अविद्यमानं ईक्षणं कल्पयितुं आरोपयितुं ईक्षितृ इव ईक्षितृ इत्युच्यते इत्यन्वयः। तदारोपस्य च प्रयोजनं नियतक्रमविशिष्टकार्योत्पादकत्वज्ञानमिति भावः। भूतमिति वा च्छेदः। भूतं भूतान्तरं अबादिकं कल्पयितुं उत्पादयितुमित्यर्थः।

**आक्षेपः**

ननु सतः अपि मृद्वत् कारणत्वाद् अचेतनत्वं शक्यम् अनुमातुम्। अतः प्रधानस्यैव अचेतनस्य सतः[17] चेतनार्थत्वात्, नियत-काल-क्रम-विशिष्ट-कार्योत्पादकत्वाच्च ऐक्षत इव ऐक्षत इति शक्यम् अनुमातुम् उपचरितमेव ईक्षणम्। दृष्टश्च लोके अचेतने चेतनवदुपचारः। यथा 'कूलं पिपतिषति' इति। तद्वत् सतोऽपि स्यात्।

**समाधानम्**

न। "तत्सत्यं स आत्मा" (छा. ६.७.१) इति तस्मिन्नात्मोपदेशात्।

**आक्षेपः**

आत्मोपदेशोऽपि उपचरितः इति चेत्, यथा 'ममात्मा भद्रसेनः' इति आत्मनः सर्वार्थकारिणि अनात्मनि आत्मोपचारः तद्वत्।

**समाधानम्**

न। सदस्मि[18] इति सत्सत्याभिसन्धस्य "तस्य तावदेव चिरम् (यावन्न विमोक्ष्येऽथ संपत्स्य इति)" (छा. ६.१४.२) इति मोक्षोपदेशात्।

---

[17] सतः प्रधानस्य इत्यन्वयः।

[18] तदस्मीति वा पाठः।

**आक्षेपः**

सोऽपि उपचारः इति चेत्, प्रधानात्माभिसन्धस्य मोक्ष-सामीप्यं वर्त्तते इति मोक्षोपदेशोऽपि उपचरितः एव।

यथा लोके ग्रामं गन्तुं प्रस्थितः, 'प्राप्तवानहं ग्रामम्' इति बूयात् त्वरापेक्षया तद्वत्।

**समाधानम्**

न। "येन विज्ञातेन अविज्ञातं विज्ञातं भवति" इति उपक्रमात्। सति[19] एकस्मिन् विज्ञाते सर्वं विज्ञातं भवति

तदनन्यत्वात् सर्वस्य, अद्वितीय-वचनाच्च।

न च अन्यद् विज्ञातव्यम् अवशिष्टं श्रावितं श्रुत्या, अनुमेयं वा लिङ्गतोऽस्ति येन मोक्षोपदेशः उपचरितः स्यात्।

सर्वस्य च प्रपाठकार्थस्य उपचरितत्व-कल्पनायां वृथा श्रमः परिकल्पयितुः स्यात् पुरुषार्थ-साधन-विज्ञानस्य

तर्केणैव अधिगतत्वात् तस्य।

तस्माद्वेद-प्रामाण्यात् न युक्तः[20] श्रुतार्थ-परित्यागः। अतः चेतनावत्कारणं जगतः इति सिद्धम्[21]।। ४ ।।

---

[19] सत्येव इति पाठे एवकारः प्रधानपक्षव्यावृत्त्यर्थः।

[20] न युक्तः इति क्वचिन्न।

[21] सतः ब्रह्मपरत्वे - तदैक्षतेति वाक्येन प्रधानं ब्रह्म वोच्यते। ज्ञानक्रियाशक्तिमत्वात् प्रधानं सर्वकारणम्।। ईक्षणाच्चेतनं ब्रह्म क्रियाज्ञाने तु मायया। आत्मशब्दात्मतादात्म्ये प्रधानस्य विरोधिनी।। (ब्र.सू प्रथमाध्याय प्रथमपादः पञ्चमाधिकरणम् १.१.५)। ब्रह्मण उभयविधकारणत्वे - निमित्तमेव ब्रह्म स्यादुपादानं च वा तथेक्षणात्। कुलालवन्निमित्तं नोपादानं मृदादिवत्।। बहु स्यामित्युपादानभावोऽपि श्रुत ईक्षितुः। एकबुद्ध्या सर्वधीश्च तस्मात् ब्रह्मोभयात्मिकम्।। (ब्र.सू प्रथमाध्याय चतुर्थपादः सप्तमाधिकरण १.४.७)।

## तृतीयः खण्डः

# तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमिति।। ६.३.१।।

तेषाम् एषां भूतानां (शरीराणाम्) खलु आण्डजं जीवजम् उद्भिज्जम् इति त्रीणि बीजानि एव भवन्ति ।। १ ।।

**तेषां** जीवाविष्टानां **खलु** **एषां** पक्ष्यादीनां **भूतानाम्**। एषाम् इति प्रत्यक्ष-निर्देशात् न तु तेजः-प्रभृतीनां, तेषां त्रिवृत्करणस्य वक्ष्यमाणत्वात्। असति त्रिवृत्करणे प्रत्यक्ष-निर्देश-अनुपपत्तिः। देवता-शब्द-प्रयोगात् च तेजः-प्रभृतिषु 'इमास्तिस्रः देवताः' इति। तस्मात् तेषां खल्वेषां भूतानां पक्षि-पशु-स्थावरादीनां **त्रीण्येव** नातिरिक्तानि **बीजानि** कारणानि **भवन्ति**। कानि तानि? इत्युच्यन्ते, **आण्डजम्** अण्डाज्जातम् अण्डजम्। अण्डजम् एव आण्डजं पक्ष्यादि। पक्षि-सर्पादिभ्यः हि पक्षि-सर्पादयः जायमानाः दृश्यन्ते। तेन पक्षी पक्षिणां बीजम्, सर्पः सर्पाणाम्, तथा अन्यदपि अण्डाज्जातं तज्जातीयानां बीजम् इत्यर्थः।।

**आक्षेपः**

ननु अण्डाज्ञ्जातम् अण्डजम् उच्यते। अतः अण्डमेव बीजमिति युक्तम्। कथम् अण्डजं बीजम् उच्यते?

**समाधानम्**

सत्यमेवं स्याद् यदि त्वदिच्छा-तन्त्रा श्रुतिः स्यात्। स्वतन्त्रा तु श्रुतिः, यतः आह अण्डजादि एव बीजं, न अण्डादि इति। दृश्यते च अण्डजाद्यभावे तज्जातीय-सन्तत्यभावः, न अण्डाद्यभावे।

अतः अण्डजादीनि एव बीजानि अण्डजादीनाम्।

तथा जीवाज्ञ्जातं **जीवजं** जरायुजम् इत्येतत् पुरुष-पश्वादि। **उद्भिज्जम्** उद्भिनत्ति इति उद्भित् स्थावरं ततो जातम् उद्भिज्जम्, धानाः वा उद्भित् ततो जायते इति उद्भिज्जम्, स्थावराणां बीजम्[22] इत्यर्थः।

स्वेदज-संशोकजयोः अण्डज-उद्भिज्जयोरेव यथा-सम्भवम् अन्तर्भावः।

एवं हि अवधारणं त्रीणि एव बीजानि इति उपपन्नं भवति।। १ ।।

---

[22] स्थावरबीजम् इति वा पाठः। उभयं वा।

**सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनानुप्रविश्य नामरूपे**

**व्याकरवाणीति।। ६.३.२ ।।**

हन्त अहम् इमाः तिस्रः देवताः अनेन जीवेन आत्मना अनुप्रविश्य नामरूपे व्याकरवाणि इति सा इयं देवता ऐक्षत । २

**सा** **इयं** प्रकृता सदाख्या तेजोबन्न-योनिः **देवता** उक्ता **ऐक्षत** ईक्षितवती यथा-पूर्वं **'**बहुस्याम्**'** इति।

तदेव बहु-भवनं प्रयोजनं न अद्यापि निर्वृत्तमिति। अतः ईक्षां पुनः कृतवती, बहु-भवनमेव प्रयोजनमुररी-कृत्य।

कथम्**?** **हन्त** इदानीम् **अहम्** **इमाः** यथोक्ताः तेज-आद्याः **तिस्रो** **देवताः**, अनेन जीवेन इति स्व-बुद्धिस्थं पूर्व-

सृष्ट्यनुभूत-प्राण-धारणम् आत्मानमेव स्मरन्ती आह - **अनेन** **जीवेन** **आत्मना** इति।

प्राण-धारण-कर्त्रात्मना इति वचनात् स्वात्मनोऽव्यतिरिक्तेन चैतन्य-स्वरूपतया अविशिष्टेन इत्येतत् दर्शयति।।

**अनुप्रविश्य** तेजोबन्न-भूत-मात्रा-संसर्गेण लब्ध-विशेष-विज्ञाना सती, नाम च रूपं च **नामरूपे** **व्याकरवाणि**

विस्पष्टम् आकरवाणि, 'असौनामा अयम्', 'इदंरूपः[23]' इति व्याकुर्याम् इत्यर्थः।

**आक्षेपः**

ननु न युक्तम् इदम् असंसारिण्याः सर्वज्ञायाः देवतायाः बुद्धि-पूर्वकम् 'अनेक-शत-सहस्रानर्थाश्रयं देहमनुप्रविश्य

दुःखम् अनुभविष्यामि' इति सङ्कल्पनम्, अनुप्रवेशश्च, स्वातन्त्र्ये सति।

**समाधानम्**

सत्यम् एवं न युक्तं स्यात् यदि स्वेनैव अविकृतेन रूपेण अनुप्रविशेयं, दुःखम् अनुभवेयम् इति च

सङ्कल्पितवती, न तु एवम्।

[23] व्याकरण-प्रकार-प्रतिपादिकां काण्व-श्रुतिं - बृ. १.४.७ - पठति । तत्रस्थ भाष्यम् - देवदत्तः यज्ञदत्तः इति वा नामा अस्य इति असौनामा अयम्, इदं शुक्लम् इदं कृष्णं वा रूपम् अस्य इति इदंरूपः।

**आक्षेपः**

कथं तर्हि?

**समाधानम्**

'अनेन जीवेनात्मना अनुप्रविश्य' इति वचनात्। जीवो हि नाम देवतायाः आभास-मात्रम्। बुद्ध्यादि-भूत-मात्रा-संसर्ग-जनितः आदर्शे इव प्रविष्टः पुरुष-प्रतिबिम्बः, जलादिषु इव च सूर्यादीनाम्। अचिन्त्यानन्त-शक्तिमत्याः देवतायाः बुद्ध्यादि-सम्बन्धः चैतन्याभासः देवता-स्वरूप-विवेकाग्रहण-निमित्तः, 'सुखी', 'दुःखी', 'मूढः' इत्यादि अनेक-विकल्प-प्रत्यय-हेतुः। छाया-मात्रेण जीव-रूपेण अनुप्रविष्टत्वाद्देवता न दैहिकैः स्वतः सुख-दुःखादिभिः सम्बध्यते। यथा पुरुषादित्यादयः आदर्शोदकादिषु च्छाया-मात्रेण अनुप्रविष्टाः आदर्शोदकादि-दोषैः न सम्बध्यन्ते तद्वद्देवता अपि। "सूर्यो यथा सर्व-लोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः।

एकस्तथा सर्व-भूतान्तरात्मा न लिप्यते लोक-दुःखेन बाह्यः" (क. २.२.११), "आकाशवत् सर्वगतश्च नित्यः" इति हि काठके। "ध्यायति इव लेलायति इव" (बृ. ४.३.७) इति च वाजसनेयके।

**आक्षेपः**

ननु च्छाया-मात्रः चेत् जीवः मृषा एव प्राप्तः, तथा पर-लोक-इह-लोकादि च तस्य।

**समाधानम्**

नैष दोषः। सदात्मना सत्यत्वाभ्युपगमात्। सर्वं च नाम-रूपादि सदात्मना एव सत्यं विकार-जातं, स्वतस्तु अनृतमेव। **“**वाचारम्भणं विकारो नामधेयम्**”** (छा. ६.४.१) इति उक्तत्वात्। तथा जीवोऽपि इति। **“**यक्षानुरूपो हि बलिः**”** इति न्याय-प्रसिद्धेः[24]। अतः सदात्मना सर्व-व्यवहाराणां सर्व-विकाराणां च सत्यत्वं, सतोऽन्यत्वेन अनृतत्वम् इति न कश्चित् दोषः तार्किकैः इह अनुवक्तुं शक्यः, यथा इतरेतर-विरुद्ध-द्वैत-वादाः स्व-बुद्धि-विकल्प-मात्राः अतत्त्व-निष्ठाः इति वक्तुं शक्यम्[25]।। २ ।।

---

[24] भोग्यप्रपञ्चस्य व्यवहारस्य च यथा मिथ्यात्वमिष्यताम् तथा भोक्तुरपि। जीवशब्दवाच्यस्य मिथ्यात्वे अपि तल्लक्ष्यस्य सन्मात्रस्य सत्यत्वमिति व्यवस्था इत्यर्थः।

[25] यथा द्वैतवादाः अतत्वनिष्ठाः इति शक्यते वक्तुं दोषवत्वात् नैवम् इह अनुवक्तुं शक्यः कश्चिदपि दोषः इति अन्वयः।

सा एवं तिस्रः देवताः अनुप्रविश्य स्वात्मावस्थे बीज-भूते अव्याकृते नाम-रूपे व्याकरवाणि इति ईक्षित्वा -

**तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो देवता अनेनैव**

**जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत्।। ६.३.३ ।।**

तासां एकैकां त्रिवृतं त्रिवृतम् करवाणि इति। सेयं देवता इमाः तिस्रः देवताः अनेनैव जीवेन आत्मना अनुप्रविश्य नामरूपे व्याकरोत्। ३

**तासां** च तिसृणां देवतानाम् **एकैकां** **त्रिवृतं** **त्रिवृतं** **करवाणि**।

एकैकस्याः त्रिवृत्करणे एकैकस्याः प्राधान्यं द्वयोः द्वयोः गुण-भावः।

अन्यथा हि रज्ज्वाः इव एकमेव त्रिवृत्करणं स्यात् न तु तिसृणां पृथक् पृथक् त्रिवृत्करणम् इति।

एवम् हि तेजोबन्नानां पृथङ्-नाम-प्रत्यय-लाभः स्यात्, ‘तेजः इदम्’, ‘इमाः आपः’, ‘अन्नम् इदम्’, इति च।

सति च पृथङ्-नाम-प्रत्यय-लाभे देवतानां सम्यग् व्यवहारस्य प्रसिद्धिः प्रयोजनं स्यात्।

एवम् ईक्षित्वा **सेयं** **देवता** **इमाः** **तिस्रः** **देवता**: **अनेनैव** यथोक्तेनैव **जीवेन** सूर्य-बिम्बवत् अन्तः-प्रविश्य वैराजं

पिण्डं प्रथमं देवादीनां च पिण्डान्[26] **अनुप्रविश्य** यथा-सङ्कल्पमेव **नामरूपे** **व्याकरोत्** 'असौनामा अयम्'

'इदंरूपः' इति।। ३ ।।

---

[26] पश्चात् देवादीनां च पिण्डान् इति।

**तासां त्रिवृतं त्रिवृतमेकैकामकरोद्यथा नु खलु सोम्य इमास्तिस्रो देवतास्त्रिवृत्**

**त्रिवृदेकैका भवति तन्मे विजानीहीति।। ६.३.४।।**

तासां (देवतानां मध्ये) एकैकाम् (देवतां) त्रिवृतं त्रिवृतं अकरोत्। सोम्य यथा नु इमाः तिस्रः देवताः एकैका त्रिवृत् त्रिवृत् खलु भवति तद् मे विजानीहि इति । ४ ।

> तासां त्रिवृतं त्रिवृतं एकैकाम् अकरोत् यथा नु खलु सोम्य इमाः तिस्रः देवताः एकैका (प्रत्येकं) त्रिवृत् त्रिवृत् (गुणप्रधानभावेन) भवति तद् मे विजानीहि (विस्पष्टम् उदाहरणतः) इति । ४ ।

**तासां** च देवतानां गुण-प्रधान-भावेन **त्रिवृतं** **त्रिवृतम्** **एकैकाम्** **अकरोत्** कृतवती देवता।

तिष्ठतु[27] तावत् देवतादि-पिण्डानां नामरूपाभ्यां व्याकृतानां तेजोबन्नमयत्वेन त्रिधात्वं, **यथा** **नु** **खलु** बहिः **इमाः** पिण्डेभ्यः **तिस्रः** **देवताः** **त्रिवृत्** **त्रिवृत्** **एकैका** **भवति** **तन्मे** मम निगदतः **विजानीहि** विस्पष्टम् अवधारय उदाहरणतः।। ४।।

---

[27] देहे त्रिवृत्करणस्य अग्रे स्फुटीकर्त्तव्यत्वाद् देहातिरिक्तेषु प्रथमं तदुदाहर्त्तुम् उपक्रमते - तिष्ठतु तावदिति।

## चतुर्थः खण्डः

यत् तद्देवतानां त्रिवृत्करणम् उक्तं तस्यैव उदाहरणम् उच्यते। उदाहरणं नाम एकदेश-प्रसिद्ध्या अशेष-प्रसिद्ध्यर्थम् उदाह्रियते इति। तदेतदाह -

**यदग्ने रोहित ँरूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्।। ६.४.१ ।।**

यद् (स्थूल) अग्नेः रोहितं रूपं तत् (सूक्ष्म)तेजसः रूपम् (इति विद्धि)। यत् (स्थूल-अग्नेः) शुक्लं (रूपं) तद् (सूक्ष्म)अपां (रूपम्) (इति विद्धि)। यद् (स्थूल-अग्नेः) कृष्णं (रूपं) तद् (सूक्ष्म)अन्नस्य (रूपम्) (इति विद्धि)। (रूपत्रयव्यतिरेकेण अग्निरिति यन्मन्यसे त्वं तस्य) अग्नेः अग्नित्वम् (इदानीम्) अपागात् (अपगतम् इत्यर्थः) । वाचारम्भणं विकारः नामधेयं त्रीणि रूपाणि एव सत्यम् इति। १

**यदग्नेः** त्रिवृत्कृतस्य **रोहितं** **रूपं** प्रसिद्धं लोके **तद्** अत्रिवृत्कृतस्य **तेजसः** **रूपम्** इति विद्धि। तथा **यत्** **शुक्लं** रूपं अग्नेरेव **तदपां** अत्रिवृत्कृतानां, **यत्कृष्णं** तस्यैव अग्नेः रूपं **तदन्नस्य** पृथिव्याः अत्रिवृत्कृतायाः इति विद्धि।

तत्रैवं सति रूप-त्रय-व्यतिरेकेण अग्निरिति यन्मन्यसे त्वं तस्य **अग्नेः** **अग्नित्वम्** इदानीम् **अपागात्** अपगतम्[28]।।

प्राग्रूप-त्रय-विवेक-विज्ञानाद् या अग्नि-बुद्धिः आसीत् ते सा अग्नि-बुद्धिः अपगता, अग्नि-शब्दश्च इत्यर्थः।

यथा दृश्यमान-रक्तोपधान-संयुक्तः स्फटिकः गृह्यमाणः 'पद्मरागः अयम्' इति शब्द-बुद्ध्योः प्रयोजकः भवति प्रागुपधान-स्फटिकयोः विवेक-विज्ञानात्। तद्विवेक-विज्ञाने तु पद्मराग-शब्द-बुद्धी निवर्त्तेते तद्विवेक-विज्ञातुः तद्वत्।

[28] यथा जलं वायुद्वयसंयोगाद्जायते (आक्सिजन् हैड्रजन् इति), तयोः पृथक्करणे जलमेव न दृश्यते।

**आक्षेपः**

ननु किमत्र बुद्धि-शब्द-कल्पनया[29] क्रियते? प्राग्रूप-त्रय-विवेक-करणात् अग्निरेव आसीत्।

तदग्नेः अग्नित्वं रोहितादि-रूप-विवेक-करणात् अपागादिति युक्तं, यथा तन्त्वपकर्षणे पटाभावः।

**समाधानम्**

नैवम्। बुद्धि-शब्द-मात्रमेव हि अग्निः यतः आह - **वाचारम्भणम्** अग्निर्नाम **विकारो** **नामधेयं** नाममात्रम्

इत्यर्थः। अतः अग्निबुद्धिरपि मृषा एव। किं तर्हि तत्र सत्यम्? **त्रीणि** **रूपाणि** **इत्येव** **सत्यम्**।

न अणुमात्रमपि रूप-त्रय-व्यतिरेकेण सत्यम् अस्ति इति अवधारणार्थः।। १ ।।

[29] अत्र अग्निविषये अग्निबुद्धिः अग्निशब्दः इति बुद्धि-शब्दयोः अधिक-कल्पनया किं क्रियते इत्यन्वयः।

तथा -

**यदादित्यस्य रोहित ँ्रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं**

**तदन्नस्यापागादादित्यादादित्यत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव**

**सत्यम्।। ६.४.२ ।।**

यद् (स्थूल)आदित्यस्य रोहितं रूपं तत् (सूक्ष्म)तेजसः रूपम्। यत् (स्थूल-आदित्यस्य) शुक्लं (रूपं) तद् (सूक्ष्म)अपां (रूपम्)। यद् (स्थूल-आदित्यस्य) कृष्णं (रूपं) तद् (सूक्ष्म)अन्नस्य (रूपम्)। आदित्याद् आदित्यत्वम् अपागात् । वाचारम्भणं विकारः नामधेयं त्रीणि रूपाणि एव सत्यम् इति। २

**यच्चन्द्रमसो रोहित ँ्रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं**

**तदन्नस्यापागाच्चन्द्राच्चन्द्रत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्।।**

**६.४.३ ।।**

यद् (स्थूल)चन्द्रमसः रोहितं रूपं तत् (सूक्ष्म)तेजसः रूपम्। यत् (स्थूल-चन्द्रमसः) शुक्लं (रूपं) तद् (सूक्ष्म)अपां (रूपम्)। यद् (स्थूल-चन्द्रमसः) कृष्णं (रूपं) तद् (सूक्ष्म)अन्नस्य (रूपम्)। चन्द्रात् चन्द्रत्वम् अपागात्। वाचारम्भणं विकारः नामधेयं त्रीणि रूपाणि एव सत्यम् इति। ३

**यद्विद्युतो रोहितँ् रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो**

**विद्युत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्।। ६.४.४ ।।**

यद् (स्थूल)विद्युतः रोहितं रूपं तत् (सूक्ष्म)तेजसः रूपम्। यत् (स्थूल-विद्युत) शुक्लं (रूपं) तद् (सूक्ष्म)अपां (रूपम्)। यद् (स्थूल-विद्युतः) कृष्णं (रूपं) तद् (सूक्ष्म)अन्नस्य (रूपम्)। विद्युतो विद्युत्वम् अपागात्। वाचारम्भणं विकारः नामधेयं त्रीणि रूपाणि एव सत्यम् इति। ४

**यदादित्यस्य** **यच्चन्द्रमसो** **यद्विद्युतः** इत्यादि समानम्।

**आक्षेपः**

ननु "यथा तु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहि" इत्युक्त्वा तेजस एव

चतुर्भिरप्युदाहरणैः अग्न्यादिभिः त्रिवृत्करणं दर्शितम्, न अबन्नयोरुदाहरणं दर्शितं त्रिवृत्करणे।।

**समाधानम्**

नैष दोषः। अबन्न-विषयाण्यप्युदाहरणानि एवमेव च द्रष्टव्यानीति मन्यते श्रुतिः।

तेजस उदाहरणमुपलक्षणार्थम्, रूपवत्त्वात्स्पष्टार्थत्वोपपत्तेश्च। गन्ध-रसयोरनुदाहरणं त्रयाणामसम्भवात्।

न हि गन्ध-रसौ तेजसि स्तः। स्पर्श-शब्दयोः अनुदाहरणं विभागेन दर्शयितुमशक्यत्वात्।

यदि सर्वं जगत् त्रिवृत्कृतमिति अग्न्यादिवत् त्रीणि रूपाणीत्येव सत्यम्, अग्नेरग्नित्ववत् अपागाज्जगतो जगत्त्वम्।

तथा अन्नस्याप्यप्शुङ्गत्वात्, आप इत्येव सत्यं वाचारम्णमात्रमन्नम्। तथा अपामपि तेजःशुङ्गत्वात् वाचारम्भणत्वं,

तेज इत्येव सत्यम्। तेजसोऽपि सच्छुङ्गत्वात् वाचारम्भणत्वं, सदित्येव सत्यम् इत्येषोऽर्थो विवक्षितः।।

**आक्षेपः**

ननु वाय्वन्तरिक्षे तु अत्रिवृत्कृते तेजःप्रभृतिष्वनन्तर्भूतत्वाद् अवशिष्येते, एवं गन्ध-रस-शब्द-स्पर्शाश्चावशिष्टा इति

कथं सता विज्ञातेन सर्वमन्यदविज्ञातं विज्ञातं भवेत्? तद्विज्ञाने वा प्रकारान्तरं वाच्यम्।

**समाधानम्**

नैष दोषः, रूपवद्-द्रव्ये सर्वस्य दर्शनात्। कथम्? तेजसि तावद्रूपवति शब्द-स्पर्शयोरप्युपलम्भात्,

वाय्वन्तरिक्षयोः तत्र स्पर्श-शब्द-गुणवतोः सद्भावोऽनुमीयते। तथा अबन्नयोः रूपवतो रस-गन्धान्तर्भाव इति। रूपवतां त्रयाणां तेजोबन्नानां त्रिवृत्करण-प्रदर्शनेन सर्वं तदन्तर्भूतं सद्विकारत्वात् त्रीण्येव रूपाणि विज्ञातं मन्यते श्रुतिः। न हि मूर्तं रूपवद्-द्रव्यं प्रत्याख्याय वाय्वाकाशयोः तद्-गुणयोर्गन्ध-रसयोर्वा ग्रहणम् अस्ति। अथवा रूपवतामपि त्रिवृत्करणं प्रदर्शनार्थमेव मन्यते श्रुतिः। यथा तु त्रिवृत्कृते त्रीणि रूपाणीत्येव सत्यम्, तथा पञ्चीकरणेऽपि समानो न्याय इत्यतः सर्वस्य सद्विकारत्वात् सता विज्ञातेन सर्वमिदं विज्ञातं स्यात्। सदेकमेवाद्वितीयं सत्यमिति सिद्धमेव भवति। तदेकस्मिन्सति विज्ञाते सर्वमिदं विज्ञातं भवतीति सूक्तम्।। २-४ ।।

## एतद्ध स्म वै तद्विद्वाँ्सः आहुः पूर्वे महाशाला महाश्रोत्रिया न नोऽद्य

## कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यतीति ह्येभ्यो विदाञ्चक्रुः।। ६.४.५ ।।

पूर्वे महाशालाः महाश्रोत्रियाः तद् एतद् (त्रिवृत्करणम्) ह वै विद्वांसः (विदितवन्तः) आहुः स्म (किमुक्तवन्तः इत्याह ) - अद्य (इदानीम्) कश्चन अश्रुतम् अमतम् अविज्ञातम् नः (अस्माकं कुले) न उदाहरिष्यति इति (सर्वं विज्ञातमेव अस्मत्कुलीनानां सद्विज्ञानवत्त्वाद् इत्यभिप्रायः) । (ते पुनः कथं सर्वं विज्ञातवन्तः इत्याह - एभ्यः इति) एभ्यः (त्रिभ्यः रोहितादिरूपेभ्यः त्रिवृत्कृतेभ्यः विज्ञातेभ्यः) हि विदाञ्चक्रुः। ५

**एतत्** **विद्वांसः** विदितवन्तः **पूर्वे** अतिक्रान्ताः **महाशालाः** **महाश्रोत्रियाः** **आहुः** **ह** **स्म** **वै** किल।

किमुक्तवन्तः? इत्याह - **न** **नः** अस्माकं कुले **अद्य** इदानीं यथोक्त-विज्ञानवतां **कश्चन** कश्चिदपि **अश्रुतममतमविज्ञातम्** **उदाहरिष्यति** नोदाहरिष्यति, सर्वं विज्ञातमेव अस्मत्कुलीनानां सद्विज्ञानवत्त्वात् इत्यभिप्रायः। ते पुनः कथं सर्वं विज्ञातवन्तः? इत्याह - **एभ्यः** त्रिभ्यः रोहितादि-रूपेभ्यः त्रिवृत्कृतेभ्यः विज्ञातेभ्यः सर्वमप्यन्यच्छिष्टमेवमेवेति **विदाञ्चक्रुः** विज्ञातवन्तः यस्मात्, तस्मात्सर्वज्ञा एव सद्विज्ञानात् ते आसुरित्यर्थः। अथवा एभ्यो विदाञ्चक्रुरिति अग्न्यादिभ्यो दृष्टान्तेभ्यो विज्ञातेभ्यः सर्वमन्यद्विदाञ्चक्रुरित्येतत्।। ५

।।

कथम्? -

**यदु रोहितमिवाभूदिति तेजसस्तद्रूपमिति तद्विदाञ्चक्रुः। यदु शुक्लमिवाभूदित्यपाँ्**

**रूपमिति तद्विदाञ्चक्रुः। यदु कृष्णमिवाभूदित्यन्नस्य रूपमिति तद्विदाञ्चक्रुः।। ६.४.६।।**

यद् उ (अन्यद्-रूपेण सन्दिह्यमाने कपोतादिरूपे) रोहितम् इव (यद् गृह्यमाणम्) (तेषां पूर्वेषां ब्रह्मविदाम्) अभूद् तद् तेजसः तद् रूपम् इति विदाञ्चक्रुः इति । यद् उ शुक्लम् इव अभूद् इति तद् अपां रूपमिति विदाञ्चक्रुः। यद् उ कृष्णम् इव अभूद् इति तद् अन्नस्य रूपमिति विदाञ्चक्रुः। ६

**यद्** अन्यद्रूपेण संदिह्यमाने कपोतादि-रूपे **रोहितम्** **इव** यद् गृह्यमाणम् **अभूत्** तेषां पूर्वेषां ब्रह्म-विदाम्, **तत्तेजसो** **रूपमिति** **विदाञ्चक्रुः**। तथा **यच्छुक्लम्** **इव** **अभूद्** गृह्यमाणं **तदपां** **रूपम्**, **यत्कृष्णम्** **इव** गृह्यमाणं **तदन्नस्येति** **विदाञ्चक्रुः**।। ६ ।।

**यद्वविज्ञातमिवाभूदित्येतासामेव देवताना्ँ समास इति तद्विदाञ्चक्रुः।**

**यथा नु खलु सोम्येमास्तिस्त्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृत्देकैका भवति तन्मे विजानीहीति।। ६.४.७ ।।**

यद् (अपि) उ अविज्ञातम् (विशेषतः अगृह्यमाणम्) इव अभूद् इति तद् (अपि) एतासाम् देवतानां एव समासः (समुदायः) इति विदाञ्चक्रुः। सोम्य यथा नु खलु इमाः तिस्रः देवताः पुरुषं (शिरःपाण्यादिलक्षणं कार्यकरणसङ्घातम्) प्राप्य (पुरुषेण उपयुज्यमानाः) एकैका त्रिवृत्-त्रिवृत् भवति तद् मे विजानीहि इति। ७

एवमेवात्यन्त-दुर्लक्ष्यं **यद्** **उ** अपि **अविज्ञातम्** **इव** विशेषतो अगृह्यमाणम् **अभूत्** **तद्** अपि **एतासामेव** तिसृणां **देवतानां** **समासः** समुदाय **इति** **विदाञ्चक्रुः**। एवं ताव□द्यं वस्त्वग्न्यादिवद्विज्ञातम्, तथेदानीं **यथा** **नु** **खलु** हे **सोम्य** **इमाः** यथोक्ताः **तिस्त्रो** **देवताः** **पुरुषं** शिरःपाण्यादि-लक्षणं कार्य-कारण-सङ्घातं **प्राप्य** पुरुषेणोपयुज्यमानाः **त्रिवृत्त्रिवृदेकैका** **भवति**, **तत्** आध्यात्मिकं **विजानीहि** निगदतः इत्युक्त्वा आह।। ७ ।।

पञ्चमः खण्डः

**अन्नम् अशितं त्रेधा विधीयते, तस्य यः स्थविष्ठो धातुस्तत् पुरीषं भवति,**

**यो मध्यमस्तन्मा ँ्सं, योऽणिष्ठस्तन्मनः।। ६.५.१ ।।**

अशितं अन्नम् त्रेधा विधीयते, तस्य यः स्थविष्ठः धातुः तत् पुरीषं भवति। यः मध्यमः तद् मांसम्। यः अणिष्ठः तद् मनः । १ ।

**अन्नम् अशितं** भुक्तं **त्रेधा विधीयते** जाठरेण अग्निना पच्यमानं त्रिधा विभज्यते। कथम्? **तस्य** अन्नस्य त्रिधा विधीयमानस्य **यः स्थविष्ठः** स्थूलतमो **धातुः** स्थूलतमं वस्तु, विभक्तस्य स्थूलोंऽशः **तत् पुरीषं भवति**। **यो मध्यम**ः अंशः धातुः अन्नस्य **तद्** रसादि-क्रमेण परिणम्य **मांसं** भवति **योऽणिष्ठः** अणुतमो धातुः सः ऊर्ध्वं हृदयं प्राप्य सूक्ष्मासु हिताख्यासु नाडीषु अनुप्रविश्य वागादि-करण-सङ्घातस्य स्थितिम् उत्पादयन् **मनो** भवति, मनो-रूपेण विपरिणमन् मनसः उपचयं करोति।

ततश्च अन्नोपचितत्वाद् मनसः भौतिकत्वम् एव, न वैशेषिक-तन्त्रोक्त-लक्षणं नित्यं निरवयवं च इति गृह्यते।

यदपि **“**मनः अस्य दैवं चक्षुः**”** (छा. ८.१२.५) इति वक्ष्यति तदपि न नित्यत्वापेक्षया।

किं तर्हि**?** सूक्ष्म-व्यवहित-विप्रकृष्टादि-सर्वेन्द्रिय-विषय-व्यापकत्वापेक्षया।

यच्च अन्येन्द्रिय-विषयापेक्षया नित्यत्वं तदपि आपेक्षिकम् एव इति वक्ष्यामः।

**“**सदेकमेव अद्वितीयम्**”** (छा. ६.२.१) इति श्रुतेः।। १ ।।

**आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति,**

**यो मध्यमस्तल्लोहितं, योऽणिष्ठः सः प्राणः।। ६.५.२ ।।**

पीताः आपः त्रेधा विधीयन्ते। तासां यः स्थविष्ठो धातुः तद् मूत्रं भवति। यः मध्यमः तद् लोहितम्। यः अणिष्ठः सः प्राणः । २ ।

**तथा आपः पीताः त्रेधा विधीयन्ते**। **तासां यः स्थविष्ठो धातुः तन्मूत्रं भवति**। **यो मध्यमः तत् लोहितं** भवति। **योऽणिष्ठः स प्राणः** भवति।

वक्ष्यति हि "आपोमयः प्राणो न पिबतो विच्छेत्स्यते" (छा. ६.७.१) इति।। २ ।।

तथा -

**तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति, यो मध्यमः स मज्जा, योऽणिष्ठः सा वाक्।। ६.५.३ ।।**

अशितं तेजः त्रेधा विधीयते। तस्य यः स्थविष्ठः धातुः तत् अस्थि भवति। यः मध्यमः स मज्जा। यः अणिष्ठः सा वाक् । ३ ।

**तेजः अशितं** तैल-घृतादि भक्षितं **त्रेधा विधीयते तस्य यः स्थविष्ठो धातुः तद् अस्थि भवति**।

**यो मध्यमः स मज्जा** अस्थ्यन्तर्गतः स्नेहः। **योऽणिष्ठः सा वाक्**।

तैल-घृतादि-भक्षणाद्धि वाग्विशदा भाषणे समर्था भवति इति प्रसिद्धं लोके।। ३ ।।

यतः एवम् -

**अन्नमयँ्हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति।**

**भूय एव मा भगवान् विज्ञापयत्विति, तथा सोम्येति होवाच।। ६.५.४ ।।**

सोम्य मनःअन्नमयं हि, प्राणः आपोमयः, वाग् तेजोमयी इति। भूय एव भगवान् मा विज्ञापयतु इति, सोम्य तथा इति ह उवाच ४ ।

**अन्नमयं हि सोम्य मनः आपोमयः प्राणः तेजोमयी वाक्**।

**आक्षेपः**

ननु केवलान्न-भक्षिणः आखु-प्रभृतयः वाग्मिनः प्राणवन्तश्च, तथा अम्मात्र-भक्ष्याः सामुद्राः मीन-मकर-प्रभृतयः

मनस्विनः वाग्मिनश्च, तथा स्नेह-पानानामपि प्राणवत्त्वं चानुमेयं यदि सन्ति, तत्र कथम् "अन्नमयं हि सोम्य

मनः" इत्यादि उच्यते?

**समाधानम्**

नैष दोषः। सर्वस्य त्रिवृत्कृतत्वात् सर्वत्र सर्वोपपत्तेः। न हि अत्रिवृत्कृतम् अन्नम् अश्नाति कश्चित्, आपो वा अत्रिवृत्कृताः पीयन्ते, तेजो वा अत्रिवृत्कृतम् अश्नाति कश्चित्, इति अन्नादानाम् आखु-प्रभृतीनां वाग्मित्त्वं प्राणवत्त्वं च इत्यादि अविरुद्धम्।

इत्येवं प्रत्यायितः श्वेतकेतुः आह - **भूय** **एव** पुनरेव **मा** मां **भगवान्** 'अन्नमयं हि सोम्य मनः' इत्यादि **विज्ञापयतु** दृष्टान्तेन अवगमयतु, न अद्यापि मम अस्मिन्नर्थे सम्यङ् निश्चयः जातः। यस्मात् तेजोबन्नमयत्वेन अविशिष्टे देहे एकस्मिन् उपयुज्यमानानि अन्न-अप्-स्नेह-जातानि अणिष्ठ-धातु-रूपेण मनः-प्राण-वाचः उपचिन्वन्ति स्वजात्यनतिक्रमेण इति, दुर्विज्ञेयम् इत्यभिप्रायः। अतः भूय एव इत्याद्याह। तमेवम् उक्तवन्तं **तथा** अस्तु **सोम्य** **इति** **ह** **उवाच** पिता। श्रृणु अत्र दृष्टान्तं यथा एतत् उपपद्यते यत्पृच्छसि।। ४ ।।

षष्ठः खण्डः

**दध्नः सोम्य मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तत् सर्पिर्भवति।।**

**६.६.१।।**

सोम्य मथ्यमानस्य दध्नः यः अणिमा स ऊर्ध्वः समुदीषति। तत् सर्पिः भवति ।१

**दध्नः** **सोम्य** **मथ्यमानस्य** **यः** **अणिमा** अणुभावः **स** **ऊर्ध्वः** **समुदीषति** सम्भूय ऊर्ध्वं नवनीत-भावेन गच्छति

**तत्** **सर्पिर्भवति**।। १ ।।

यथा अयं दृष्टान्तः -

**एवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवति।। ६.६.२ ।।**

सोम्य एवम् एव खलु अश्यमानस्य अन्नस्य यः अणिमा स ऊर्ध्वः समुदीषति। तद् मनः भवति। २

**एवमेव** **खलु** **सोम्य** **अन्नस्य** ओदनादेः **अश्यमानस्य** भुज्यमानस्य औदर्येण अग्निना वायु-सहितेन खजेन इव मथ्यमानस्य **योऽणिमा** **स** **ऊर्ध्वः** **समुदीषति** **तन्मनो** **भवति** मनोऽवयवैः सह सम्भूय मनः उपचिनोति इत्येतत्।। २ ।।

तथा -

**अपाँ् सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवति।।**

**६.६.३ ।।**

सोम्य पीयमानानाम् अपां यः अणिमा स ऊर्ध्वः समुदीषति। सः प्राणो भवति। ३

**अपां सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति सः प्राणो भवति** इति।। ३ ।।

एवमेव खलु -

**तेजसः सोम्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भवति।।**

**६.६.४ ।।**

सोम्य अश्यमानस्य तेजसः यः अणिमा स ऊर्ध्वः समुदीषति। सा वाग् भवति। ४

**सोम्य तेजसः अश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्** भवति।। ४ ।।

**अन्नमयँ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति।**

**भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्येति होवाच।। ६.६.५ ।।**

सोम्य मनः अन्नमयं हि, प्राणः आपोमयः, वाक् तेजोमयी इति। भगवान् भूय एव मा विज्ञापयतु इति। सोम्य तथा इति ह उवाच । ५

**अन्नमयं हि सोम्य मनः**, **आपोमयः प्राणः**, **तेजोमयी वागिति**। युक्तमेव मया उक्तम् इति अभिप्रायः।

अतः अप्तेजसोः अस्तु एतत् सर्वमेवम्।

मनस्तु अन्नमयम् इत्यत्र न एकान्तेन मम निश्चयः जातः, अतः **भूय एव मा भगवान्** मनसोऽन्नमयत्वं दृष्टान्तेन

**विज्ञापयतु इति**। **तथा सोम्य इति होवाच** पिता।। ५ ।।

सप्तमः खण्डः

**षोडशकलः सोम्य पुरुषः पञ्चदशाहानि माशीः काममपः पिब।**

**आपोमयः प्राणो न पिबतो विच्छेत्स्यत इति।। ६.७.१ ।।**

सोम्य षोडशकलः पुरुषः पञ्चदश अहानि मा आशीः कामम् अपः पिब। आपोमयः प्राणो न पिबतो विच्छेत्स्यते इति। १

अन्नस्य भुक्तस्य योऽणिष्ठो धातुः, स मनसि शक्तिमधात्।

सा अन्नोपचिता मनसः शक्तिः षोडशधा प्रविभज्य पुरुषस्य कलात्वेन निर्दिदिक्षिता।

तया मनस्यन्नोपचितया शक्त्या षोडशधा प्रविभक्तया संयुक्तः तद्वान्कार्य-कारण-सङ्घात-लक्षणो जीव-विशिष्टः

पुरुषः षोडश-कलः उच्यते। यस्यां सत्यां द्रष्टा, श्रोता, मन्ता, बोद्धा, कर्त्ता, विज्ञाता सर्व-क्रिया-समर्थः पुरुषो

भवति। हीयमानायां च यस्यां सामर्थ्य-हानिः। वक्ष्यति च “अथान्नस्यायै द्रष्टा” (छा. ७.९.१) इत्यादि।

सर्वस्य कार्य-कारणस्य सामर्थ्यं मनःकृतमेव। मानसेन हि बलेन सम्पन्ना बलिनो दृश्यन्ते लोके ध्यानाहाराश्च

केचित्, अन्नस्य सर्वात्मकत्वात्। अतः अन्न-कृतं मानसं वीर्यम्।

षोडश कलाः यस्य पुरुषस्य सोऽयं **षोडशकलः** **पुरुषः**।

एतच्चेत् प्रत्यक्षी-कर्त्तुम् इच्छसि, **पञ्चदश** संख्याकानि **अहानि** **माशीः** अशनं माकार्षीः।

**कामम्** इच्छातः, **अपः** **पिब**, यस्मात् **न** **पिबतः** अपः ते प्राणो **विच्छेत्स्यते** विच्छेदम् आपत्स्यते, यस्माद्

**आपोमयः** अब्विकारः **प्राणः** इत्यवोचाम।

न हि कार्यं स्वकारणोपष्टम्भमन्तरेण अविभ्रंशमानं स्थातुमुत्सहते।। १ ।।

**स ह पञ्चदशाहानि नाशाथ हैनमुपससाद किं ब्रवीमि भो इत्यृचः सोम्य यजूँ्षि**

**सामानीति स होवाच न वै मा प्रतिभान्ति भो इति।। ६.७.२ ।।**

स ह पञ्चदश अहानि न आश। अथ ह एनम् उपससाद किं ब्रवीमि भो इति ऋचः सोम्य ऋचः यजूंषि सामानि इति। भो मा न वै प्रतिभान्ति इति स ह उवाच । २

**स** **ह** एवं श्रुत्वा मनसः अन्नमयत्वं प्रत्यक्षीकर्त्तुम् इच्छन् **पञ्चदशाहानि** **न** **आश** अशनं न कृतवान्।

**अथ** षोडशे अहनि **हैनम्** पितरम् **उपससाद** उपगतवान्। उपगम्य च उवाच - **किं** **ब्रवीमि** **भो** **इति**।

इतर आह - **ऋचः** **सोम्य** **यजूंषि** **सामानि** अधीष्व **इति**।

एवमुक्तः पित्रा आह - **न** **वै** **मा** मां ऋगादीनि **प्रतिभान्ति** मम मनसि न दृश्यन्ते इत्यर्थः हे **भो** भगवन् **इति**।।

२ ।।

एवमुक्तवन्तं पिता आह - श्रृणु तत्र कारणं येन ते तानि ऋगादीनि न प्रतिभान्ति इति -

**तँ होवाच यथा सोम्य महतोऽभ्याहितस्यैकोऽङ्गारः खद्योतमात्रः परिशिष्टः स्यात्तेन ततोऽपि न बहु दहेदेवँ सोम्य ते षोडशानां कलानाम् एका कलातिशिष्टा स्यात्तयैतर्हि वेदान्नानुभवस्यशानाथ मे विज्ञास्यसीति।। ६.७.३ ।।**

तं ह उवाच सोम्य यथा महतः अभ्याहितस्य एकः खद्योतमात्रः अङ्गारः परिशिष्टः स्यात् तेन ततः अपि बहु न दहेत् एवं सोम्य ते षोडशानां कलानाम् एका कला अतिशिष्टा स्यात् तया एतर्हि वेदान् न अनुभवसि। अशान अथ मे विज्ञास्यसि इति । ३

**तं** **होवाच** **यथा** लोके हे **सोम्य** **महतः** महत्परिमाणस्य **अभ्याहितस्य** उपचितस्य इन्धनैः अग्नेः **एकः** **अङ्गारः** **खद्योतमात्रः** खद्योत-परिमाणः शान्तस्य परिशिष्टः **अवशिष्टः** **स्यात्** भवेत् **तेन** अङ्गारेण **ततोऽपि** तत्परिमाणात् ईषदपि **न** **बहु** **दहेत्** **एवम्** एव खलु **सोम्य** **ते** तव अन्नोपचितानां **षोडशानां** **कलानाम्** **एका** **कला** अवयवः **अतिशिष्टा** अवशिष्टा **स्यात्** **तया** त्वं खद्योत-मात्राङ्गार-तुल्यया **एतर्हि** इदानीं **वेदान्** **न** **अनुभवसि** न प्रतिपद्यसे। श्रुत्वा च **मे** मम वाचम् **अथ** अशेषं **विज्ञास्यसि** **अशान** भुङ्क्ष्व तावत्।। ३ ।।

**स हाशाथ हैनमुपससाद तँ्ह यत्किञ्च पप्रच्छ सर्वँ्ह प्रतिपेदे।। ६.७.४ ।।**

**स** **ह** तथा एव **आश** भुक्तवान्। **अथ** अनन्तरं **ह** **एनम्** पितरं शुश्रूषुः **उपससाद**। **तं** **ह** उपगतं पुत्रं **यत्किञ्च** ऋगादिषु **पप्रच्छ** ग्रन्थ-रूपमर्थजातं वा पिता स श्वेतकेतुः **सर्वं** **ह** तत् **प्रतिपेदे** ऋगाद्यर्थतः ग्रन्थतश्च।। ४ ।।

**तँ्होवाच यथा सोम्य महतोऽभ्याहितस्यैकमङ्गारं खद्योतमात्रं परिशिष्टं तं तृणैरुपसमाधाय प्राज्वलयेत्तेन ततोऽपि बहु दहेत्।। ६.७.५ ।।**

**तं** **होवाच** पुनः पिता **यथा** **सोम्य** **महतोऽभ्याहितस्य** इत्यादि समानम्। **एकम्** **अङ्गारं** शान्तस्य अग्रेः **खद्योत-मात्रं** **परिशिष्टं** **तं** **तृणैः** चूर्णैः च **उपसमाधाय** **प्राज्वलयेत्** वर्धयेत्। **तेन** इद्धेन अङ्गारेण **ततोऽपि** पूर्व-परिमाणात् **बहु** **दहेत्**।। ५ ।।

**एवँ सोम्य ते षोडशानां कलानामेका कलातिशिष्टाऽभूत् सान्नेनोपसमाहिता**

**प्राज्वाली तयैतर्हि वेदाननुभवस्यन्नमयँ हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति**

**तद्धास्य विजज्ञाविति विजज्ञाविति ।। ६.७.६ ।।**

**एवं सोम्य ते षोडशानाम्** अन्न-**कलानाम्** सामर्थ्य-रूपाणाम् **एका कला अतिशिष्टा अभूत्** अतिशिष्टा आसीत्

पञ्च-दशाहानि अभुक्तवतः एकैकेन अह्ना एकैका कला चन्द्रमस इव अपर-पक्षे क्षीणा।

**सा** अतिशिष्टा कला तव **अन्नेन** भुक्तेन **उपसमाहिता** वर्धिता उपचिता **प्राज्वाली**। दैर्ध्यं छान्दसम्।

प्रज्वलिता वर्धिता इत्यर्थः। 'प्राज्वालीत्' इति पाठान्तरम्। तदा तेन उपसमाहिता स्वयं प्रज्वलितवती इत्यर्थः।

**तया** वर्धितया **एतर्हि** इदानीं **वेदान् अनुभवसि** उपलभसे।

एवं व्यावृत्त्यनुवृत्तिभ्याम् अन्नमयत्वं सिद्धम् इति उपसंहरति - **अन्नमयं हि सोम्य मनः** इत्यादि।

यथा एतद् मनसोऽन्नमयत्वं तव सिद्धम् तथा **आपोमयः प्राणः तेजोमयी वागिति** एतदपि सिद्धम् एव इत्यभिप्रायः।

**तत्** एतत् **ह** अस्य पितुरुक्तं मन-आदीनाम् अन्नादिमयत्वं **विजज्ञौ** विज्ञातवान् श्वेतकेतुः। द्विरभ्यासः त्रिवृत्करण-प्रकरण-समाप्त्यर्थः।। ६ ।।